# সর্বসিদ্ধিপ্রদং পুষ্টিপতিস্তোত্রম্

{॥ সর্বসিদ্ধিপ্রদং পুষ্টিপতিস্তোত্রম্ ॥}

শ্রী গণেশায়নমঃ ।

রাধাকৃষ্ণাবূচতুঃ ।

পুষ্টিপতে নমস্তুভ্যং নমঃ শঙ্করসূনবে ।

ব্রহ্মভূতায় দেবায় সর্বসিদ্ধিপ্রদায় তে ॥ ১॥

স্বানন্দবাসিনে তুভ্যং ব্রহ্মপুত্রায় তে নমঃ ।

সিদ্ধিবুদ্ধিপতে তে বৈ গণেশায় নমো নমঃ ॥ ২॥

হেরম্বায় নমস্তুভ্যং নমো যোগময়ায় চ ।

সর্বাদয়ে চ সর্বেশ সর্বজ্ঞায় নমো নমঃ ॥ ৩॥

নির্গুণায় নমস্তুভ্যং সগুণায় নমো নমঃ ।

গজাননায় বৈ তুভ্যমভেদায় নমো নমঃ ॥ ৪॥

শান্তিরূপায় শান্তায় শান্তিদায় মহোদর ।

মূষকবাহনায়ৈব গাণপত্যপ্রিয়ায় তে ॥ ৫॥

অনন্তানন্তরূপায় ভক্তসংরক্ষণায় চ ।

ভক্তিপ্রিয়ায় দেবায় ভক্ত্যধীনায় তে নমঃ ॥ ৬॥

*Stotram Digitalized By Sanskritdocuments.org*

চতুর্বাহুধরায়ৈব নাগযজ্ঞোপবীতিনে ।

শূর্পকর্ণায শূরায পরশুধর তে নমঃ ॥ ৭॥

বিষ্ণুপুত্রায সর্বেষাং পিত্রে মাত্রে নমো নমঃ ।

বিনাযকায বিপ্রাণাং পুত্রায তে নমো নমঃ ॥ ৮॥

সর্বেষাং গর্বহন্ত্রে চ সর্বেভ্যঃ সুখদায তে ।

লম্বোদরায বিঘ্নেশ ব্রহ্মনাযক তে নমঃ ॥ ৯॥

কিম্ স্তুবস্ত্বাং গণাধীশ যত্র বেদাদযঃ প্রভো ।

শুকশম্ভ্বাদযশ্চৈব বভূবুঃ কুণ্ঠিতাঃ পরম্ ॥ ১০॥

আবাং গর্বযুতৌ জাতৌ ব্রহ্মাকারৌ বৃথা প্রভো ।

তত্র ত্ত্বযা চ বিঘ্নেন কৃতং গর্বস্য খণ্ডনম্ ॥ ১১॥

সাধূনাং বিঘ্নহর্তা ত্বং শান্তিযোগার্থমঞ্জুসা ।

অসাধূনাং বিনাশায হ্যতস্ত্বাং প্রণমামহে ॥ ১২॥

বিঘ্নযুক্ততযা ঢুণ্ঢে আবাভ্যাং যোগসেবযা ।

সাক্ষাৎকারঃ কৃতস্ত্বং বৈ সমীচীনমিদং কৃতম্ ॥ ১৩॥

হৃদি চিন্তামণিং ত্বাং চ পশ্যাবঃ সততং প্রভো ।

অতঃ সুশুভদো বিঘ্নঃ সঞ্জাতো নো গজানন ॥ ১৪॥

অধুনা দেহি বিঘ্নেশ ভক্তিং তে চরণাম্বুজে ।

দৃঢাং যযা চ গর্বেণ ন ভবাবঃ সমাযুতৌ ॥ ১৫॥

ইত্যুক্ত্বা তং প্রণম্যৈব ননৃততুর্মুদান্বিতৌ ।

ধন্যৌ প্রব্রুবতৌ ধন্যৌ দর্শনাদ্গণপস্য তৌ ॥ ১৬॥

ব্রহ্মোবাচ ।

ততস্তৌ গণনাথো বৈ জগাদ ভক্তিভাবতঃ ।

দৃষ্ট্বা প্রেমরসাহ্লাদযুক্তৌ রাধাজনার্দনৌ ॥ ১৭॥

শ্রীপুষ্টিপতিরুবাচ ।

ভো রাধে কৃষ্ণ মে বাক্যং শৃণুতং জগদীশ্বরৌ ।

মদীযাং ভক্তিমত্যন্তং করিষ্যেথে ন সংশযঃ ॥ ১৮॥

সঙ্কটে স্মরণেনৈব প্রকটঃ সম্ভবাম্যহম্ ।

যং যমিচ্ছথ আনন্দং সফলং তং ভবিষ্যতি ॥ ১৯॥

ভবৎকৃতমিদং স্তোত্রং পঠনাচ্ছ্রবণান্নৃণাম্ ।

সর্বসিদ্ধিপ্রদং পূর্ণং ভবিষ্যতি সুরেশ্বরৌ ॥ ২০॥

মৎপ্রীতিবর্ধনং নিত্যং বাঞ্ছিতার্থকরং ভবেত্ ।

অন্তে স্বানন্দদং কৃষ্ন ভবিষ্যতি ন সংশযঃ ॥ ২১॥

ইতি মৌদ্গলে পুষ্টিপতিস্তোত্রং সম্পূর্ণম্ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sarva Siddhi Prada PushtiPati Stotram Lyrics in Bengali PDF
% File name : sarvasiddhipradaMpuShTipatistotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj)
% Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mudgalapurANa
% Latest update : September 16, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website